दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-220 | 1 | जून 08 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः ज्येष्ठशुक्लत्रयोदशी
ज्येष्ठ 25 प्रविष्ठांशः मङ्गलमयः भवेत्


2 शिक्षामन्त्रिणा सह सभया प्राथमिकशिक्षकसङ्घः आन्दोलनस्य समाप्तिम् अकरोत्

3 "एकादशीमालक्ष्य श्रीमद्भागवत-महापुराणाश्रित-राष्ट्रियव्याख्यानगोष्ठी सुसम्पन्ना"

4 भारतस्य लौहपुरुषस्य मूर्तिः एव एकतामूर्तिः


## भारतदेशः विकसितराष्ट्र-निर्माणे कृषि-क्षेत्रीय-परिष्कारपूर्वकं कृषकाणाम् इतोप्यधिकसमृद्ध्यै च निर्भरः अस्ति - शिवराज सिंह चौहानः



हिमसंस्कृतवार्ताः - केन्द्रीय-कृषि-कल्याण-मन्त्रिणा शिवराजसिंह चौहानेन उक्तं यत् भारतदेशः विकसितराष्ट्र-निर्माणे कृषि-क्षेत्रीय-परिष्कारपूर्वकं कृषकाणाम् इतोप्यधिकसमृद्ध्यै च निर्भरः अस्ति। सः कृषकान् वैज्ञानिकानाञ्च वचनं श्रुत्वा तेषां परामर्शाणां उपयोगेन स्वकार्यं सुदृढं कर्तुं विकसितकृषि-संकल्पाभियानस्य आधिक्येन लाभं ग्रहीतुञ्च प्रोत्साहितवान्। अवधेयमस्ति यत् सः मध्यप्रदेशस्य सीहोरजनपदे एकस्मिन् कार्यक्रमे प्रवदन् आसीत्। आयोजने एकपञ्चाशत् कोटिरूप्यकाणां विकासपरियोजनानां प्रारम्भोऽपि तेन विहितः ।

## केन्द्रीय-उपभोक्तृ-संरक्षण-प्राधिकरणस्य सर्वेभ्यः ई-वाणिज्य-मञ्चेभ्यः परामर्शः




हिमसंस्कृतवार्ताः - केन्द्रीय-उपभोक्तृ-संरक्षण-प्राधिकरणेन सर्वेभ्यः ई-वाणिज्य-मञ्चेभ्यः परामर्शः प्रसारितोऽस्ति यत् तेषां मञ्चाः कपटानुचित-व्यापार-व्यवहारेषु संलग्नाः न भवेयुरिति सुनिश्चितं कर्तुं आवश्यकोपायाः स्वीकर्तव्याः। एकस्मिन् वक्तव्ये उपभोक्तृकार्यमन्त्रालयः अवदत् यत् सर्वे ई-वाणिज्यिक-मञ्चाः त्रिषु मासेषु वाणिज्यिक व्यवहाराणां कृष्णरूपाणि ज्ञातुं आत्म-परीक्षणाय सूचिताः सन्ति। मन्त्रालयः अवदत् यत् प्राधिकरणं कृष्णरूपाणां निवारणाय नियमनाय च निर्गमितानां मार्गनिदेशानाम् उल्लङ्घनं निकटतया निरीक्षमाणम् अस्ति।

## प्रधानमन्त्री नरेन्द्रमोदी अफ्रिकासङ्घस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आपदवरोधिमूलसंरचना सम्मेलने भागग्रहणे प्रसन्नतां प्रकटितवान्



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी अफ्रिकासङ्घस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आपदवरोधिमूलसंरचनासम्मेलने भागग्रहणे प्रसन्नतां प्रकटितवान्। सीडीआरआई इति सङ्घ आभासीय-माध्यमेन सम्बोधयता प्रधानमन्त्रिणा कार्याचरण-कार्यक्रमाणां परिकल्पना, विकासशील-राष्ट्रेभ्यः वित्तोपलब्धता च भवतु इति सुनिश्चेतुं सबलं स्वविचाराः प्रकटिताः। श्रीमोदिना आशा प्रकटिता यत् अस्मिन् सम्मेलने चर्चायां विभिन्नेषु विषयेषु विचारः भविष्यति । प्रधानमन्त्रिणा मोदिना फ्रांसदेशस्य राष्ट्रपतेः इमैनुएल मैक्रों इत्यस्य समर्थन-प्रदाने, तस्मै धन्यवादाः प्रदत्ताः। ध्यातव्यं वर्तते यत् एतत् सम्मेलनं प्रथमवारं फ्रान्सदेशे आयोजितम् अस्ति।

## देशस्य परिश्रमि-कृषकाणां सेवा सर्वकारस्य सौभाग्यम् अस्ति प्रधानमन्त्री नरेन्द्रमोदी



हिमसंस्कृतवार्ताः - प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतीय-कृषकाणां कल्याणार्थं सर्वकारस्य प्रतिबद्धता पुनरुद्घाटिता। केन्द्रस्य एन्. डी. ए- सर्वकारस्य एकादशवर्षपूर्तौ, देशस्य परिश्रमि-कृषकाणां सेवा सर्वकारस्य सौभाग्यम् अस्ति श्रीमोदी अवदत्। तेनोक्तं यत् गतैकादश-वर्षेभ्यः सर्वकारस्य विभिन्नाः उपक्रमाः कृषकाणां समृद्धिं वर्धितवन्तः, कृषिक्षेत्रस्य समग्रपरिवर्तनम् अपि सुनिश्चितं कृतवन्तः । सः अवदत् यत् सर्वकारेण मृत्तिका स्वास्थ्यं, सिञ्चनेत्यादिषु विषयेषु ध्यानं दत्तम् अस्ति, येन कृषकाः अत्यधिकतया लाभान्विताः भवन्तः सन्ति । श्रीमोदी अपि अवदत् यत् आगामिनि काले कृषकाणां कल्याणार्थं सर्वकारस्य प्रयत्नाः अधिकशक्त्या सञ्चालयिष्यन्ते ।

## भारते गतैकादशवर्षेषु प्रायः सप्तविंशति-कोटिजनाः आत्यन्तिक- दरिद्रताः मुक्ताः अभवन् - विश्ववित्तकोषः




हिमसंस्कृतवार्ता - विश्ववित्तकोषानुसारं भारतीयानां सम्पत्तिः एकादश-द्वादशोत्तर-द्विसहस्रतमवर्षतः एकोनसप्तत्युत्तरद्विशतमिलियनमिताः जनाः अतिदरिद्रतायाः उपरि आनीय भारतेन आत्यन्तिका प्रगतिः कृता। विश्ववित्तकोषस्य नवीनतमं दत्तांशानुसारं, यत्र आत्यन्तिक- दारिद्र्य एकादश-द्वादशोत्तर-द्विसहस्रतमवर्षे दशमलवैकोत्तर-सप्तविंशतिः प्रतिशतमासीत् तत्रैव द्वाविंशति-त्रयोविंशत्युत्तर-द्विसहस्रतमे वर्षे केवलं दशमलवत्र्यधिक-पञ्चप्रतिशतं यावत् महत्त्वपूर्णरूपेण न्यूनीकृतमस्ति। अस्य अधिकांश प्रगतिः उत्तरप्रदेशः, महाराष्ट्रः, बिहारः, पश्चिमबङ्गालः, मध्यप्रदेशः इत्यादिषु राज्येषु अभवदिति विश्ववित्तकोषेण सूचितम्।

## नार्वे-चतुरङ्ग-क्रीडायां, विश्वविजेता डी. गुकेशः तृतीयस्थानं, म्याग्रस् कार्ल्सन् इत्यसौ च उपाधिम् अवाप्नोत्

हिमसंस्कृतवार्ताः - चतुरङ्ग-क्रीडायां विश्वविजेता डी गुकेशः अन्तिमचक्रे अमेरिकादेशीय क्रीडकं फवियानो कारुआना इत्यमुं विरुध्य महतीं त्रुटिं कृत्वा तृतीयस्थानं प्राप्तवान्, तत्रैव पञ्चधा विश्वविजेत्रा मैग्नस - कार्ल्सन् इत्यनेन नॉर्वे-चतुरङ्ग क्रीडायां सप्तमो जयो लब्धः।

## सुभाषितम्

**आरोप्यते शिला शैले**
**यत्नेन महता यथा।**
**पात्यते तु क्षणेनाधस्**
**तथात्मा गुणदोषयोः।।**

अर्थात्- किसी बड़ी शिला को पर्वत पर चढ़ाना अत्यंत कठिन होता है। अनेक प्रयत्नों से चढ़ाया जा सकता है परन्तु उसे गिराना बहुत सरल है। केवल एक क्षण में ही नीचे गिर जाता है वैसे ही गुणों को बढ़ाना अत्यंत कठिन कार्य है, दोष तो क्षण में ही आ जाते हैं।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११


## बलिदानस्य पर्व ईद-उल्-अजहा इति देशस्य विभिन्नेषु भागेषु धार्मिकोत्साहेन मुस्लिमधर्मस्य-अवलम्बिभिः आचरितः



हिमसंस्कृतवार्ताः - बलिदानस्य पर्व ईद-उल्-अजहा इति देशस्य विभिन्नेषु भागेषु धार्मिकोत्साहेन मुस्लिमधर्मावलम्बिभिः आचरितः। अवसरेऽस्मिन् राष्ट्रपतिना, प्रधानमन्त्रिणा, उपराष्ट्रपतिना, च देशवासिभ्यः ईद-उल-अजहा इति पर्वणः शुभकामनाः प्रदत्ताः।

# अन्नाडेल-चक्रविमानस्थलात्
## उपराष्ट्रपतिनः धनखड़वर्यस्य प्रेषणम्



हिमसंस्कृतवार्ता:- शिमला। भारतस्य उपराष्ट्रपतेः जगदीपधनखड़स्य राज्ये द्विदिनस्य वासस्य अनन्तरं अन्नाडेल हेलीपैड इत्यत्र प्रेषणम् अभवत्। अस्मिन्नवसरे राज्यपालः शिवप्रतापशुक्लः एवं मुख्यमन्त्री सुखविन्दरसिंहसुक्खु उपस्थितौ आस्ताम्। तत्सङ्गमे उपमुख्यमंत्री मुकेश अग्निहोत्री, लोकनिर्माणमंत्री विक्रमादित्यसिंहः, महापौरः सुरेन्द्रचौहानः, मुख्यसचिवः प्रबोध सक्सेना, पुलिसमहानिदेशकः अशोक तिवारी, अन्यवरिष्ठाः प्रशासनिकाधिकारिणः, पुलिसस्य सेनायाः चाधिकारिणः चापि उपस्थिता आसन्।

### प्रातःकाले राजभवने प्रातराशः अभवत्

सोलनं गमनात् पूर्वं उपराष्ट्रपतिः राजभवने प्रातराशं कृतवान्। प्रातराशस्य मध्ये स्वच्छं रसं, दुग्धं, मक्कीबीजानि, इडली-साम्बरः, पोहा, उपमा, शाककटलेट, अङ्कुराणि, नवनीतटोस्ट चेत्यादीनि स्थापितानि आसन्।

## काङ्ग्रेसनेत्री सोनिया गान्धी इत्यस्याः स्वास्थ्यं अकस्मात् क्षीणं जातम्, नियमितपरीक्षा परीक्षणं च कृत्वा पुनः प्रत्यागता




हिमसंस्कृतवार्ता:- शिमला। अवकाशदिनानि यापयितुं शिमलानगरं प्राप्ता पूर्वकाङ्ग्रेस-अध्यक्षा सोनिया गान्धी शनिवासरे अकस्मात् रुग्णा अभवत्। तदनन्तरं सा आईजीएमसी शिमला इत्यत्र प्रवेशं प्राप्तवती। अधुना वार्ता अस्ति यत् परीक्षणं च कृत्वा सोनिया गान्धी आईजीएमसी शिमलातः मुक्ता। सोनिया गान्धी इत्यस्याः स्वास्थ्यस्य क्षयः जातः ततः परं मुख्यसचिवः प्रबोध सक्सेना अपि आईजीएमसी संस्थानं प्राप्तवान्। सोनिया गांधी छराबड़ायां स्वपुत्र्याः, काङ्ग्रेस- महासचिवस्य च प्रियङ्कागान्धी इत्यस्याः गृहे निवसति। एषा तस्याः शिमलानगरस्य व्यक्तिगतभ्रमणम् अस्ति। प्राप्तसूचनानुसारं काङ्ग्रेससंसदीयपक्षस्य अध्यक्षा सोनियागान्धी शिमलानगरस्य इन्दिरागान्धीचिकित्सालये केनचित् लघुस्वास्थ्यसमस्यायाः कारणात् नियमितस्वास्थ्यपरीक्षायै आनीता आसीत्। वैद्याः तां परीक्षितवन्तः। तस्याः स्थितिः स्थिरा अस्ति। हिमाचलप्रदेशस्य मुख्यमन्त्रिणः प्रधानपरामर्शकः (मीडिया) नरेशचौहानः इत्यनेन एषा सूचना दत्ता।

### मुख्यमन्त्री सुक्खुः शिमलानगरं प्रत्यागतवान्

अवधेयं वर्तते यत् राज्यसभा सदस्या सोनिया गान्धी शनिवासरे आईजीएमसी शिमला इत्यत्र प्राप्ता। अत्र सा रेडियोलॉजी विभागं नीता। यत्र तस्याः एमआरआई कृतम्। अस्मिन् काले स्वास्थ्यमन्त्री अपि आईजीएमसी-संस्थानं प्राप्तवान्। सः अपि साक्षात् विभागं प्रति अगच्छत्। एतदतिरिक्तं सर्वकारस्य अन्ये जनाः अपि अत्र आगतवन्तः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अपि स्वीयं द्विदिनात्मकं ऊनाभ्रमणं मध्यमार्गे त्यक्त्वा शिमलानगरं प्रति प्रत्यागतवान्।

# शिक्षामन्त्रिणा सह सभया प्राथमिकशिक्षकसङ्घः
## आन्दोलनस्य समाप्तिम् अकरोत्




हिमसंस्कृतवार्ता:- शिमला। शिक्षामन्त्री रोहितठाकुरेण सह मिलित्वा प्राथमिकशिक्षकसङ्घः विगतसार्धैकमासात् प्रचलतादोलनं समाप्तं कर्तुं निर्णयं कृतवान्। शिक्षकसङ्घस्य याचनाः विचारार्थं विद्यालयशिक्षानिदेशकस्य आशीषकोहली इत्यस्य अध्यक्षतायां समितिः निर्मिता। अस्यां समित्यां शिक्षकसङ्घस्य पदाधिकारिणः अपि समाविष्टाः भविष्यन्ति। एषा समितिः आगामिदिनेषु विविधयाचनानां विषये विस्तरेण चर्चां करिष्यति।

शिक्षामन्त्री रोहितठाकुरः अवदत् यत् राज्ये विद्यालयस्तरस्य एकमेव शिक्षानिदेशालयं भविष्यति, सर्वकारेण एषः निर्णयः न निवृत्तः। प्रथमतः पञ्चमपर्यन्तं, षष्ठतः १२ पर्यन्तं च कक्षायाः कार्यस्य निरीक्षणार्थं पृथक् पृथक् अतिरिक्तनिदेशकद्वयं नियुक्तं भविष्यति।

## फलरसं पायित्वा आन्दोलने उपविष्टानां संघस्य पदाधिकारिणाम् अन्नशनं समापितवान् शिक्षामन्त्री

शिक्षामन्त्री रोहितठाकुरः शनिवासरे शिक्षानिदेशालये लालपानी इत्यत्र अनशनं कर्तुम् उपविष्टानां हिमाचलप्रदेशस्य राजकीय-प्राथमिक- शिक्षकसंघस्य पदाधिकारिभ्यः फलरसं दत्त्वा अन्नशनस्य समाप्तिम् अकारयत्। शिक्षामन्त्री रोहितठाकुरः अवदत् यत् राज्यप्राथमिकशिक्षकसङ्घस्य सर्वकारस्य च मध्ये अधिकांशविषयेषु परस्परं सहमतिः कृता, अन्येषु लम्बितविषयेषु च सहमतिः प्राप्तुं निदेशक- विद्यालयशिक्षायाः अध्यक्षतायां समितिः निर्मिता।

# ये १५०० रुप्यकाणां प्रतिज्ञां दत्त्वा सत्तां प्राप्तवन्तः, ते अधुना जनसामान्यतः १०- १० रूप्यकाणि संगृहणन्ति- जयरामठाकुरः

हिमसंस्कृतवार्ता:- ठियोगः। शनिवासरे ठियोगक्षेत्रे भाजपा- जिला- महासुसभायाः आयोजनं कृतम्, यस्याः अध्यक्षता जिलाध्यक्षः अरुण फालटा अकरोत्। सभां सम्बोधयन् विपक्षनेता जयरामठाकुरः अवदत् यत् अस्माकं सौभाग्यं यत् देशस्य केन्द्रे प्रधानमन्त्री नरेन्द्रमोदीरूपेण सशक्तं निर्णायकं च नेतृत्वं वर्तते। यूपीए- सङ्घस्य १० वर्षीयशासनकाले अन्ताराष्ट्रीयमञ्चेषु भारतं सम्मानं न प्राप्नोत्, परन्तु गत ११ वर्षेषु प्रधानमन्त्री मोदी इत्यस्य नेतृत्वे भारतम् अन्ताराष्ट्रीयमञ्चेषु अद्भुतं सम्मानं प्राप्तवान्। यूपीएकाले भारतस्य अर्थव्यवस्था ११ तमे स्थाने आसीत् अधुना चतुर्थस्थानं प्राप्तवती, अस्माभिः एतस्य विषये कदापि कल्पना अपि न कृता आसीत्। नरेन्द्रमोदी शासनकाले त्रितलाकः, अनुच्छेदः ३७० समाप्तः अभवत्, अस्माकं ५०० वर्षीयः राममन्दिरस्य निर्माणस्य स्वप्नः पूर्णः अभवत्। जयरामठाकुरः अवदत् यत् मुख्यमन्त्री सुक्खुः यदा चालितां कल्याणकारीयोजनां स्थगयति तदा प्रसन्नः भवति, यत् कर्तव्यं तत् अहं करिष्यामि इति वदति।



वर्तमान काङ्ग्रेससर्वकारः आगामिषु काले कार्यं स्थगयितुं प्रसिद्धः भविष्यति। यदि अद्य हिमाचलप्रदेशे निर्वाचनं भवति तर्हि भाजपायाः महत् बहुमतं भविष्यति, यतः काङ्ग्रेससर्वकारः केवलं राज्ये करम् आरोपयितुं एव केन्द्रितः अस्ति। सर्वकारीयबसयानानां भाटकम् अनेकवारं वर्धितम् अस्ति। अधुना राज्ये स्वास्थ्यपरीक्षण-पञ्जीकरणस्य कृते १० रुप्यकाणि गृहीतानि भविष्यन्ति यद् निःशुल्कम् आसीत्। तेषां स्वास्थ्यमन्त्री कथयति यत् अस्माभिः एतत् शुल्कं आरोपितम् यत् पञ्जीकरणपत्रं नष्टं न भवति। भो! हिमाचलप्रदेशे चतुर्मासान् यावत् सीटीस्कैन, एमआरआई, अल्ट्रासाउण्ड इत्यादीनां तिथयः न प्राप्यन्ते अधुना भवन्तः रोबोटिकशल्यक्रियायाः विषये वदन्ति। सः अवदत् यत् हिमाचलप्रदेशस्य जनाः अद्यापि सर्वकारेण कृतानां प्रतिज्ञानां प्रतीक्षां कुर्वन्ति। अधुना Old Pension Scheme इत्यस्य स्थाने UPS इत्यस्य चर्चा भवति। महिलाभ्यः १५०० रूप्यकाणि दातुं स्थाने तेभ्यः १०-२० रूप्यकाणि गृह्णन्ते। सभायां मुख्यवक्तारुपेण विपक्षस्य नेता पूर्वमुख्यमन्त्री जयरामठाकुरः, वक्तारूपेण भाजपाराज्य मीडियाप्रभारी करण नन्दा आस्ताम्।

# "एकादशीमालक्ष्य श्रीमद्भागवत-महापुराणाश्रित-राष्ट्रियव्याख्यानगोष्ठी सुसम्पन्ना"




हिमसंस्कृतवार्ताः - डॉ आलोकः कटनी,मध्यप्रदेशः महर्षिमहेशयोगीवैदिकविश्वविद्यालयः, ब्रह्मस्थानम्, कटनी मध्यप्रदेशः, डी ए वी पी जी कॉलेज, वाराणसी, चातुर्वेदप्रचारसंस्थानम्, वाराणसी च इत्येतेषां संयुक्ततत्त्वावधानेन एकादशीवर्चुअलसंगोष्ठ्याः नवमपर्यायक्रमे ज्येष्ठशुक्लैकादश्यां २०२५ तमे वर्षे जूनमासस्य षष्ठे (०६) तमे दिनाङ्के श्रीमद्भागवत-महापुराणाश्रित-षष्ठस्कन्दमुररीकृत्य राष्ट्रियव्याख्यानगोष्ठी द्विसत्रात्मककार्यक्रमरूपेण सुसम्पन्ना।अस्य कार्यक्रमस्य अध्यक्षः आसीत् प्रो. प्रमोदकुमारवर्मामहोदयः, (कुलगुरुः, महर्षि महेश योगी वैदिक विश्वविद्यालयः, मध्यप्रदेशः)शुभेस्मिन्पावनमुहूर्ते सायं षड्वादने वैदिकीयमङ्गलाचरणेन कार्यक्रमस्यास्य आरम्भ अभवत्। तत्र सामवेदरहस्यान्ताध्ययनशालिना आचार्यसम्पत्कुमारवर्येण मङ्गलाचरणम् आचरितम्। तदनु समुपस्थितानाम् अतिथिनां स्वागतव्याहृतिः परिचयश्च डॉ० दीपककुमारशर्मामहोदयेन कृतः।प्रथमसत्रे तावत् विशिष्टवक्तृत्वेन आचार्यः निलिम्प त्रिपाठीमहोदयः, महर्षि महेश योगी वैदिक विश्वविद्यालयः,भोपालतः समुपस्थितः आसीत्। महोदयेन स्वीयाललितपूर्णवाण्या नैकशास्त्रजनितव्यावहारिकश्चोदाहरणैः ज्येष्ठशुक्लैकादशीमाहात्म्यं विधिः उपवासगतरहस्यं प्रतिपाद्य श्रीमद्भागवत-महापुराणाश्रित-षष्ठस्कन्दमुररीकृत्य अजामिलोपाख्यानतः नारायणकवचपर्यन्तं सुष्ठुरूपेण व्याख्यां प्रदाय नादसृष्टि इत्यादिविषये अपि चर्चा कृता। ततः शद्धेयः भागवतभास्करभाक् कृष्णचन्द्रशास्त्रीठाकुरमहाराजः,वृन्दावनतः षष्ठस्कन्दस्य सम्पूर्णविषयः प्रतिपादितः तेन सह मध्ये मध्ये इतरस्कन्दस्थविविधोदाहरणैः शास्त्रमतेन स्वीयानुभवेन भावपुरस्सरम् अभिनययुक्तसङ्गीतशैल्या सुमधुरवाण्या सुललितकण्ठेन सरलतया सहजभावेन च विषयः प्रतिपादितः। तैरुक्तं यत् - "भागवतं पुस्तकं न अपितु साक्षात् कृष्ण इति व्यजानीयात्", द्वादशस्कन्दानि अङ्गानि इति उक्त्वा वैष्णवाः द्वादशस्थानेषु तिलकं धारयन्ति। राम-कृष्ण-नारायण-प्रभृतीनां नाम्नः महिमानं बोधयन् भागवतं प्रतिदिनं सर्वैरपि अवश्यमेव पठनीयम् इति निवेदितम्। ईदृशाकार्यक्रमायोजनाय अन्ये जनाः अपि प्रेरिताः। तत् पश्चात् क्रमेस्मिन् गोरक्षपुरतः डॉ० अभिषेकपाण्डेयमहोदयेन सर्वेभ्यः अतिथिभ्यः,समन्वयकेभ्यः,आयोजकेभ्यः, संयोजकसहसंयोजकेभ्यः, जूम् शृङ्खलामाध्यमेन उपस्थितभागवतपिपासुभ्यः, कार्यक्रमसंयोजकेन डॉचन्द्रकान्तदत्तशुक्लमहोदयेन प्रसारित "मार्गदर्शनम्" इति यूटुबवाहिन्यां भागवतरसास्वादितेभ्यः दर्शकेभ्यः, प्रत्यक्षतया परोक्षतया च सहकृतेभ्यः भागवतरसपानशीलेभ्यः सर्वेभ्यः मनसा वाचा हृद्या च धन्यवादव्याहृतिः प्रदत्ता। अत्रभागवतरसिकानां सङ्ख्याः नवतिः प्रायः आसीत्। कार्यक्रमस्यास्य परिसमाप्तिः समन्वयकेन डॉ°आलोकचन्द्रपरिडामहोदयेन(साहायकप्राध्यापकः वेदविभागाध्यक्षश्च, महर्षि महेश योगी वैदिक विश्वविद्यालयः, ब्रह्मस्थानम्, कटनी, मध्यप्रदेशः) शान्तिपाठपुरस्सरं सुचारूतया सञ्चालनं कृतम् इति शम्।

## ब्रिक्स्-राष्ट्राणां मध्ये संसदीय-सहकारं सुदृढं कर्तुं सार्थक-संवादः, विचाराणां आदानप्रदानम्, सहभागि प्रतिबद्धताञ्च भवेत् - लोकसभायाः अध्यक्षः



हिमसंस्कृतवार्ताः - लोकसभायाः अध्यक्षः ओम बिरला अवदत् यत्, भारतं सर्वदा विधिप्रशासनस्य, वैश्विकसहयोगस्य, विश्व-मञ्चे संवादस्य च आवश्यकतायाः समर्थनं करोति। ब्रजील्-देशस्य ब्रसीलिया-नगरे आयोजिते एकादशे ब्रिक्स्-संसदीय-सम्मेलने भारतीय-प्रतिनिधिसङ्घस्य नेतृत्वे चलचित्रीय-सन्देशम् प्रसारयन् श्रीबिरलावर्यः सूचितवान् यत्, ब्रिक्स्-राष्ट्राणां मध्ये संसदीय-सहकारं सुदृढं कर्तुं सार्थक-संवादः, विचाराणां आदानप्रदानम्, सहभागि प्रतिबद्धताञ्च भवेत् । सः अकथयत् यत् ब्रिक्स्-देशाः पहलगाम्-क्षेत्रे आतङ्काक्रमणस्य निन्दाम् अकुर्वन्, संयुक्तप्रयासमाध्यमैः आतङ्काक्रमणं विरुध्य शून्य-सहिष्णुतायाः नीतिं स्वीकर्तुञ्च अवधानं दत्तवन्तः

## भारत-युनैटेड् किङ्ग्डम् इत्येतयोर्मध्ये सद्यस्सम्पन्नं मुक्तवाणिज्यिकसमन्वयेन सह द्विपक्षीय-योगदान-सम्मेलनञ्च महत्त्वपूर्णमस्ति - विदेशमन्त्री



हिमसंस्कृतवार्ताः - विदेशमन्त्री डा. एम्. जयशङ्करः अवोचत् यत् भारत-युनैटेड् किङ्ग्डम् इत्येतयोर्मध्ये सद्यस्सम्पन्नं मुक्तवाणिज्यिकसमन्वयेन सह द्विपक्षीय-योगदान-सम्मेलनञ्च महत्त्वपूर्णमस्ति । नवदेहल्यां यू. के. विदेशसचिवेन डेविड् लैमी इत्यनेन सह मिलित्वा डा. जयशङ्करः अवदत् यत् एषा सन्धिः न केवलं द्विमार्गीयव्यापारं निवेशञ्च प्रवर्धयिष्यति अपितु उभय-राष्ट्रयोर्मध्ये द्विपाक्षिकसम्बन्धैस्सह अन्येषु सामरिक पक्षेष्वपि सकारात्मकप्रभावं जनयिष्यति। सः अवदत् यत् आपूर्ति-मूल्यशृङ्खलानां सुदृढीकरणेऽपि अस्य योगदानं भविष्यतीति। डॉ. जयशङ्करः पहलगाम् इत्यत्र बर्बरातङ्कक्रमणस्य दृढ-निन्दायै, आतङ्कवादं विरुध्य कृते युद्धे च भारतस्य समर्थनाय यू. के. सर्वकारं प्रति साधुवादान् प्रेषितवान्। सः अवदत् यत् भारतं आतङ्कवादं विरुध्य शून्य-सहिष्णुतायाः नीतिः आचरति, सहभागिनश्च तदवगच्छन्त्विति अपेक्षते।

# राहुलगान्धी उक्तवान् यत् भाजपादलेन महाराष्ट्रनिर्वाचनं 'मैच फिक्सिंग' इत्यनेन विजितम्



हिमसंस्कृतवार्ताः। नई दिल्ली। महाराष्ट्रविधानसभानिर्वाचनं 'मैच फिक्सिंग' इत्यनेन विजयं प्राप्तम्, एवं प्रकारेण निर्वाचनं जित्वा लोकतन्त्राय विषवत् इति पूर्वकाङ्ग्रेसाध्यक्षः, लोकसभायां विपक्षनेता च राहुलगान्धी आरोपितवान्। राहुलगान्धी, सामाजिकमाध्यमेषु दैनिकपत्रिकायां प्रकाशितस्य स्वस्य लेखस्य अंशान् प्रकाशयन् शनिवासरे अवदत् यत्, "निर्वाचनचोर्याः सम्पूर्णा क्रीडा। २०२४ तमस्य वर्षस्य महाराष्ट्रविधानसभानिर्वाचनं लोकतन्त्रस्य भष्ट्राचारस्य प्रतिरूपः आसीत्। मम लेखे मया विस्तरेण व्याख्यातं यत् एतत् षड्यंत्रं कथं पदे पदे रचितम्। सः अवदत् यत्, "प्रथमं निर्वाचनायोगस्य नियुक्तिं कुर्वन्तं प्यानलं गृहीतम्, ततः मतदातासूचौ अवास्तविकाः मतदातारः योजिताः, ततः मतदानस्य प्रतिशतं व्याप्तं तथा च यत्र भाजपायाः विजयः भवितुम् अर्हति स्म तत्र तत्र लक्ष्यं कृत्वा अप्रत्याशितं मतदानं कृतम् ततः प्रमाणानि गोपितानि। राहुलगान्धी उक्तवान् यत् महाराष्ट्रे भारतीयजनतापक्षः किमर्थम् एतावत् क्रुद्धः इति अवगन्तुं सर्वथा कठिनं नास्ति। परन्तु निर्वाचनेषु भ्रष्टाचारः अपि मैचनिर्धारणवत् भवति। यः दलः भ्रष्टाचारं करोति सः विजयं प्राप्नुयात्, परन्तु एतेन लोकतान्त्रिकसंस्थाः दुर्बलाः भवन्ति, जनसमूहस्य परिणामेषु विश्वासः नष्टः भवति ।

# पार्ले जी पिष्टकम् विदेशे २३४२ रुप्यकेषु विक्रीयते







हिमसंस्कृतवार्ताः। पिष्टकस्य (Biscuit) विषये वक्तुं पार्ले-जी इत्यस्य उल्लेखं न भवेत् एतत्  न भवितुं शक्यते। भारते कदापि कोऽपि व्यक्तिः नास्ति यः एतत् पिष्टकम् न खादितवान् । श्वानः विडालाः अपि एतत् पिष्टकम् खादितवन्तः। ५ रुप्यकस्य पार्ले-जी इत्यस्य १० रुप्यकस्य चायस्य सम्बन्धः अत्यन्तं पुरातनं अस्ति। भारते केवलं ५ रुप्यकेन विक्रीयते एतत् पिष्टकम् एकस्मिन् नगरे एतावत् महत् विक्रीयते यत् तस्य मूल्यं ज्ञात्वा भवान् स्तब्धः भविष्यति। गाजादेशे पार्ले-जी पिष्टकम् २३४८ रुप्यकेषु विक्रीयते।

वस्तुतः गाजातः एकं पोस्ट् सामाजिकमाध्यमेषु वायरल् भवति यस्मिन् पुष्टिः क्रियते यत् गाजानगरे अधुना पार्ले-जी २४ यूरो अर्थात् प्रायः २३४२ रुप्यकेषु विक्रीयते। पोस्ट् मध्ये सः व्यक्तिः बालकेन सह एकं चित्रं सार्वजनिकं कृतवान्, अस्मिन् चित्रमध्ये पार्ले-जी पिष्टकम् इत्यस्य पुटकम्  अपि अस्ति । तत् चित्रं सार्वजनिकं कुर्वन् सः व्यक्तिः लिखितवान् यत् "दीर्घप्रतीक्षां कृत्वा अद्य अन्ततः मया रविफस्य प्रियं पिष्टकम् प्राप्तम्। मूल्यं १.५ यूरोतः २४ यूरोतः अधिकं यावत् वर्धितम् अस्ति चेदपि अहं रविफस्य प्रियं पिष्टकम् दातुं न अस्वीकृतवान्। तदनन्तरं एतत् चलचित्रम् अतीव वायरल् इति भवति, यतः फोटोमध्ये दृष्टस्य अस्य पुटकस्य मूल्यं भारते ५०-१०० रुप्यकाणि स्यात्, परन्तु सः व्यक्तिः पुष्टिं कृतवान् यत् गाजादेशे तस्य मूल्यं २३४२ रुप्यकम् अस्ति। जनाः अपि तस्मिन् सन्देशविषये स्वस्य टिप्पणीं ददति। केचन जनाः भारतात् गाजादेशं प्रति पार्ले-जी पिष्टकम् प्रेषयितुम् अपि कथयन्ति। इजरायल-गाजा-देशयोः मध्ये प्रचलिते विवादे  गाजा-देशे महर्घता चिरकालात् चरमरूपेण वर्ते इति वदामः | तत्र खाद्यपदार्थेषु अतीव महतीः सन्ति । अत एव भारते ५ रुप्यकेन उपलभ्यमानं पार्ले-जी बिस्कुटं गाजादेशे एतावत् महत् विक्रीयते।

# भारतस्य लौहपुरुषस्य मूर्तिः एव एकतामूर्तिः

भारतस्य लौहपुरुषस्य मूर्तिः एव एकतामूर्तिः अस्ति । यतो हि लौहपुरुषः एकतायाः प्रतीकः आसीत् । अस्य मूर्तिनिर्माणस्य विचारधारायाः पृष्ठभूमौ लौहपुरुषस्य भारतैकतायाः विचाराः सन्ति । विनोबा भावे-महाभागस्य मते भारतीयेतिहासे लौहपुरुषस्य अमरत्वस्य बहूनि कारणानि सन्ति । परन्तु तेषु द्वे मुख्ये कारणे स्तः । एकं तु बारडोली-सत्याग्रहः (१९२८), अपरं स्वतन्त्रतोत्तरं भारतीयराज्यानां भारते विलिनीकरणम् । राष्ट्रियान्दोलनस्य सुचारुसञ्चालनेन, साफल्येन च वल्लभभाई पटेल नवीनां सरदार इतीमाम् उपाधिं प्राप्तवान् । सरदार वल्लभभाई पटेल इति अद्यापि तस्य नाम सगर्वं गृह्यते। 'सरदार' इत्यस्य गुजराती-हिन्दी-शब्दस्यार्थाः नेता, नायकः, सञ्चालकः इत्यादयः ।

एकतामूर्तिप्रकल्पे लौहपुरुषस्य १८२ मी. उन्नतमूर्तेः निर्मिता अस्ति। सरदार वल्लभभाई पटेल-जलबन्धस्य पुरतः अस्याः एकतामूर्तेः निर्माणं जातम्। तस्मात् जलबन्धात् ३.२ कि.मी. दूरे निर्मिता भारतस्य एकताप्रतीकस्य लोहपुरुषस्य एकतामूर्तिः । भारतस्य गुजरातराज्यस्य भरुच-नगरसमीपे नर्मदानद्याः साधुद्वीप-नामके (Sadhu island of Narmada River) द्वीपे विश्वस्य अत्युन्नतायाः एकतामूर्तिः विद्यते ।एकतामूर्तिप्रकल्पे अन्यलघुप्रकल्पानामपि समावेशो भवति । यथा – साधुसेतुः (a bridge connecting the statue on Sadhu island to the bank), सरदार-स्मारकः, अभ्यागतभवनानि (buildings for visitors), स्मारकोद्यानम्, अतिथिभवनं (a five star hotel), सम्मेलनभवनं, मनोरञ्जनवाटिका, संशोधनकेन्द्रम्, अभ्यासकेन्द्रम् इत्यादिकम्।



एकतामूर्तिप्रकल्पाय सरदार वल्लभभाई पटेल राष्ट्रियैकतासंस्थायाः – सवपरास (Sardar Vallabhbhai Patel Rashtriya Ekta Trust - SVPRET) गुजरातसर्वकारेण स्थापना कृता अस्ति ।

## निर्माणम्

२०१० तमस्य वर्षस्य 'अक्तूबर'-मासस्य सप्तमे दिनाङ्के एकतामूर्तिनिर्माणस्य घोषणा जाता आसीत् । निर्माणं च २०१८ अक्तूबर मध्ये समाप्तम्। आधारसहितमूर्तेः औन्नत्यम् आहत्य २४० मी. विद्यते। उपप्रकल्पैः सह एकतामूर्तिप्रकल्पस्य विस्तारः आहत्य १९,५०० च.कि.मी. अस्ति । तत्र १८२ मी. उन्नता एकतामूर्तिः, ५८ मी. उन्नतः मूर्त्याधारः च अस्ति। एतत् सम्पूर्णं निर्माणं सारलोहेन (with steel) क्लृप्तं (prepared) विद्यते । जलरक्षकेण वज्रचूर्णेन (reinforced cement concrete) एकतामूर्तेः, एकतामूर्त्याधारस्य च निर्माणम् अभवत् । सम्पूर्णस्य निर्माणस्य आवेष्टनं (coating) कांस्य(bronze)धातुना अभवत्

# "विनोदकणिका"

## "धन्याः पुणेनगरस्य जनाः"

पुणेनगरस्य एकः जनः स्वस्य हर्म्यात् बहिः एकं नामफलकं स्थापितवान्। **"वस्त्रपात्रप्रक्षालिका आवश्यकी"** इति। ये ये जनाः नामफलकं पश्यन्ति ते चिन्तयन्ति- अस्य कोऽर्थः?

अग्रिमे दिने एकः *चाणाक्षः व्यक्तिः* हर्म्यस्य पार्श्वे अन्यं नामफलकं उपस्थाप्य अलिखत्- प्रतिवेशिनस्य नामफलकस्य अर्थं ज्ञातुम् अधस्तने क्रमाङ्के दशरूप्यकाणां 'डिजिटल  (Digital) पेमेन्ट (Payment)' करोतु, संदेशेन उत्तरं लभेत्। ये ये जनाः रूप्यकाणि दत्तवन्तः तैः संदेशद्वारा उत्तरं प्राप्तम्-

"गृहकार्यार्थं कर्मकरी आवश्यकी"

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# पहाड़ीगल्लां

हिमसंस्कृतवार्ताः

## थप्पड़/चंड

चंडा रा नांव सुणी कने सिर लगदा चकराणे
स्कूल टैमा च तां चंड रोज़ ई पौंदी थी खाणे
चंड पौणे पर बी माव बूढ़े कुछ नी थे गलांदे
अजकला रे माव बुढेयाँ साई पौंदे नी थे खाणे

घरें देखदे जे तां माव बूढ़े करदे थे खूब चन्डाई
फर्क रई जांदा था जे तां मास्टर देंदे थे गुवाई
मजाल आ जे बच्चा उआँ ते चूं करी जाओ
जे मास्टरां री चंड रहन्दी जारी तां नी हुन्दी अज्ज मगज
खपाई

सै बी थे ज़माने तांजे मास्टर कुट्टी कने पवाच्छा थे पांदे
मजाल थी जे छोरू कने माव बूढ़े कुछ भी गलांदे
मास्टरे पावें कन्न ई खिंज्या होवे थोड़ा जेया अज्जकल
दूजे दिन अखवारा च मास्टरा रे तां झंडे झूली जांदे

मशहूर आदमिएँ जो तांजे पौंदी किसी ते चंड
तां चंड मारने वाल़े जो पुल़सा वाल़े झट करी देंदे बन्द
पर जे गरीब माहणुएँ जो मारे कोई बड्डा आदमी चंड
बड्डे जो कोई नी पुछदा तां बी गरीब माहणु ई हुँदा तंग

मशहूर आदमिएँ जो तांजे कोई थप्पड़ लाणे जो हुँदा मजबूर
तां कई बार सै थप्पड़ लाणे वाल़ा हुई जांदा रातों रात मशहूर
भुलदा नी माहणु अपणे पर बीतियाँ निक्कियां गल्लां जो बी
होर करी नी सकदे पावें थप्पड़ ई सई बदला लैंदे सै  जरूर

उल्टा सीधा बोले जे कोई ताईं पौवां थप्पड़
अप्पूं जो किसी नी लैणा ईँयाईं बैठिरेयाँ लक्कड़
दो ई आदमी मारी सकदे दूजे जो थप्पड़
इक्क सैजे बौहत दुखी कने दूजा सैजे फक्कड़

थप्पड़ गुस्से च या मना च कुछ हो ताईं किसी जो लगदा
पर थप्पड़ा ते बाद मामला सुलझदा नी होर बददा
थप्पड़ किसी समस्या रा कदी बी हल नी हुई सकदा
सोचदा माहणु फेरी पर सैजे हुणा सै नी कदी बी टल़दा

रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र

